# Dhīmahi


**Research Journal**
**of**
**Chinmaya International Foundation Shodha Sansthan**

**Volume X** शकसं १९४० विक्रमसं २०७५-७६ **2019**



Editor
**Dilip Kumar Rana**



**Chinmaya International Foundation Shodha Sansthan**
**Adi Sankara Nilayam, Veliyanad**
**Ernakulam, Kerala**
**India**

ISSN 0976-3066

# Dhīmahi

## Research Journal Volume 10

**Patrons**

**Prof. Parameswara Narayana Shastry**
Vice-Chancellor, Rashtriya Sanskrit Sansthan

**Swami Advayananda**
Acharya, Chinmaya International Foundation

**Editorial Board**

Prof. G. Gangadharan Nair, Chairman
Prof. V. Kutumba Shastri, Member
Prof. S. Subramanya Sarma, Member
Prof. P. Geervani, Member
Prof. Dilip Kumar Rana, Editor

© Director, Chinmaya International Foundation Shodha Sansthan
Published with the financial assistance of Rashtriya Sanskrit Sansthan,
Ministry of Human Resource Development, Govt. of India, New Delhi

# Contents


1. On the Criteria of Ānanda as Puruṣārtha: A Textual Analysis of the Debate in Madhusūdana Sarasvatī's Advaitasiddhi — 1
*S Bhuvaneshwari*

2. भरत मुनि का नाट्यशास्त्र एवं कालिदास का अभिज्ञानशाकुन्तलम् — 11
*वसन्तकुमार म. भट्ट,*

3. पाणिनीयधातुवृत्तीनां तुलनात्मकमध्ययनम् — 22
*एन्. शैलजा तथा अम्बा कुलकर्णि*

4. नैयायिकमतरीत्या आक्षेपाद्व्यक्तिभानस्य खण्डनम् — 38
*का. ई. गोपालदेशिकन्*

5. उपनिषत्सु भौतिकविषयविज्ञानम् — 48
*डा. वि. वसन्तकुमारि*

6. Special features of Buddhist Hybrid Sanskrit Language — 55
*Anirban Dash*

7. मातृका-वर्ण-विमर्शः — 65
*Bhaskar Ray*

8. Ṛgveda Anukramaṇīs – Nature and Contribution to the Study of Vedic Literature — 75
*Harshada Sawarkar*

9 Upaniṣadic teaching on the nature of the Ātman and Brahman — 83
*John Hierl*

10. संस्कृतशास्त्रे भौतिकविज्ञानम् — 89
*डा. रावूरि गायत्रीमुरलीकृष्णः*

11. Juvenile Crime Act and Mahabharata — 95
*Vinayak Rajat Bhat*

12 Mahābhāṣyam as the base for Bhartṛhari : Exploring Nañartha — 105
*Mridula Aswin*

13. वैयाकरणसिद्धान्तेषु शास्त्रान्तरसिद्धान्तोपयोगः — 113
*डॉ. पङ्कजकुमारव्यासः*

14. कलिदिनसङ्ख्यामवलम्ब्य केरळसंस्कृतकवीनां कालनिर्णयः — 121
*श्रीनिवासन् पी के*

15. पुष्पचिन्तामणिः — 127
*Dr. Joshi Santosh Kumar*

16. जिनहर्षगणिप्रणीत – अनर्घराघवावचूर्णिटीकायाः वैशिष्ट्यम् 138
*Subhankar Basak*

17. तत्त्ववादस्थापकः श्रीमध्वाचार्यः 151
*बि.गोपालाचार्यः*

18. A Comparative analysis of PAC Model in Transactional analysis and Guṇatrayavibhāga Yoga Chapter 14 of Bhagavad Gītā" 156
*Rammohan Subramaniam*

19. पाणिनीयव्याकरणे संज्ञानां बाध्यबाधकभावचिन्तनम् 166
*स्वाती का. धर्मे*

20. Śivāmṛtasārasamuccaya of Śrīśadeva: an Introduction 172
*Anil Kumar Acharya*

21. रसस्य सुखस्वरूपत्वविमर्शः 193
*Dibyendu Mondal*

22. समस्तवेदस्य वेदान्तडिण्डिमत्वम् 199
*Naveen Bhat S*

23. Consciousness verses Awareness : Perspectives from Advaita and Nyāya 207
*Pawan Kumar Upadhyay*

24. The Development of Chinese Language from Buddhism 213
*Prachi Agarwal*

Book Review

25. Punarnavā - Part II of Prof. O. Vatsala A Malayalam Commentary on the Vyākaraṇamahābhāṣyam of Patañjali 225
*V. R. Manoj*

26. Review of Srī Rāmānuja The Great Integrator 228
*V R Manoj*

# पाणिनीयधातुवृत्तीनां तुलनात्मकमध्ययनम्

*- N. Shailaja & Amba Kulkarni*

## 1. प्रस्तावना

धातुपाठोऽष्टाध्याय्या अभिन्नमङ्गं वर्तते। ग्रन्थो ह्ययं धातूनां सङ्ग्रहरूपो दशसु गणेषु विभक्तोऽस्ति । गणविभागस्तु धातुभ्यः सार्वधातुकप्रत्यये परतः शबादिविकरणाधारितः। यथा दिवादिगणधातुजन्यक्रियासु श्यन्विकरणात्पूर्वं तिङादेः पदपुरुषवचनत्वादिनिर्देशकत्वम्। प्रत्येकं धातुरुदात्तादिस्वरचिह्नितः सन् तदर्थेन युक्तो वर्तते। केचन धातवो ञि-टु-डु-इत्येवमादिभिरित्संज्ञकैर्विशेषचिह्नैरपि भूषिता भवन्ति, तत्कारणात् तेभ्यो धातुभ्यो रूपसिद्धिवेलायां सूत्रविशेषस्योपस्थितिर्जायते येन तत्तद्धातूनां विशेषरूपाणि दृष्टिपथमायान्ति। उदाहरणार्थं "ड्वितः क्त्रिः" (अ. ३.३.८८) इति सूत्रेण ड्विद्भ्यो धातुभ्यः क्त्रिः प्रत्ययो विधीयते। यथा - डुकृञ् -> कृत्रिमम्, डुपचष् -> पक्त्रिमम्। "अनुदात्तेदादिभ्यो धातुभ्य "अनुदात्तङित आत्मनेपदम्" (अ. १.३.१२) इत्यादिभिः सूत्रैरात्मनेपदं परस्मैपदं च विधीयेते । धात्वर्थविशेषोऽपि कदाचित् धातुरूपविशेषे हेतुर्भवति। यथा - "नाञ्चेः पूजायाम्" (अ. ६.४.३०) इति सूत्रेण अञ्चतेर्धातोः पूजायाम् अर्थे "अनिदितां हल उपधायाः०" (अ. ६.४.२४) इत्यनेन प्राप्तो नलोपः प्रतिषिध्यते । धातुपाठे धातूनां सङ्ग्रहमात्रमेव न विद्यते अपितु सर्वधातुरूपसिद्ध्यर्थं प्रत्येकं धातुरावश्यकसङ्केतचिह्नैरपि भूषितो वर्तते।

उदात्तेत्त्वाऽनुदात्तेत्त्वङित्त्वञित्वधात्वर्थादयो धातुरूपसिद्धिवेलायाम् अष्टाध्याय्याः सूत्रविशेषाणामुपस्थापका भवन्तीति धातुपाठाष्टाध्याय्योर्मध्येऽभिन्नसम्बन्धो विद्यत इति वक्तुं शक्यते। किञ्च धातुपाठे स्वल्पतरोऽपि पाठभेदोऽसाधुरूपं जनयिष्यति। अतो वेदवद्धातुपाठोऽपि यत्नतः परिरक्षणीयः । परन्तद्विपरीततया धातुपाठस्य प्रविष्टिषु नैकरूपता दरीदृश्यन्ते। (दृष्टिगोचरा भवति)। विद्यमानानि नैकानि संस्करणानि परस्परं बेभिद्यन्तेतमाम् । धातुरूपसिद्ध्यर्थं महदुपकारकम् उदात्तेत्त्वानुदात्तेत्त्वानुनासिकत्वादिकञ्च कालान्तरे लुप्तम्। यो नु सम्प्रदायो महत्या सतर्कतया युगान्तरैर्न केवलं वेदान् पर्यपालयत्, तद्रक्षार्थं जटा-मालादिपाठप्रभेदरूपान् उपायविशेषानप्याविश्चकार येन प्रक्षिप्तपाठं पाठदोषं वाऽभिज्ञाय तत्परिहारं विधाय निर्दुष्टा वेदाः सम्प्रापिताः, स एव सम्प्रदायो धातुपाठस्य संरक्षणे न किमप्यवधानं प्रादादिति महानयमाश्चर्यस्य विषयः।

विकटेऽस्मिन्काले महतः मोदस्य विषयः एषः यद् गोयलः (२००९), मिश्रः (२००९) श्रीधरश्च (२००९) शार्फ (Scharf, २००९) इत्यादयः पाणिनीयप्रणाल्या अनुसरणार्थं, कृतप्रयत्ना दृश्यन्ते। अनुसन्धातार इमे अष्टाध्याय्याः स्वाभाविकीं संरचनां संरक्षितुं कामयन्ते। तत्र तावदेतादृशस्य धातुपाठस्य महती आवश्यकता विद्यते यत्र सर्वासु वृत्तिषूपवर्णिता पाठभेदा एकत्र वैद्युतरूपेण सङ्कलिताः स्युर्येन धातुरूपसिद्धि-वेलायां रूपभेदानां प्रभावोऽवधातुं शक्यते। इत्थमिमामेव शुशोधिषां मनसि निधाय विद्यावारिधौ "Comparison of Paniniya Dhatuvrtties" इत्याख्यया शोधकार्यं कृतम्[1]। अस्य पत्रस्यामूलाग्रमपि विद्यावारिधेः शोधग्रन्थमाधारीकृत्यैव लिखितम्।

## 2. पूर्वशोधप्रबन्धाः

धात्वनुक्रमणिका सर्वप्रथमं लाइबिच् (Liebich) महोदयेन १९२८ तमे वर्षे सङ्कलिता। तेन पञ्चधातुपाठैः सह पाणिनीयधातुपाठस्य तिस्रः टीका अपि अस्यां समाविष्टाः। पळसुले (Palsule, १९५५) पुनरस्यामेव अन्यान् चतुरोऽपाणिनीयान् धातुपाठान् समावेश्य कार्यमिदं सम्पन्नप्रायं चकार। पळसुले (Palsule) महोदयस्याऽनुक्रमणिकायाः प्रमुखा विषया अधस्तादुद्ध्रियन्ते -

1. सर्वे धातवोऽस्मिन्नकारादिक्रमेणोल्लिखिताः, न तु पाणिनीयधातुपाठक्रमाधारेण।
2. प्रत्येकं धातोर्गणत्वम् उपग्रहत्वञ्च विभिन्नधातुपाठानामाधारेणोपवर्णितम्।
3. धातुसूच्यां सङ्कलिता धातवोऽध उद्ध्रियमाणेभ्यः स्थानेभ्यः सङ्गृहीताः-
    a. The St Petersburg Dictionary,
    b. Sanskrit-English Dictionary by Monier Williams,
    c. Whitney महोदयेन सङ्कलिता धातवः
    d. आधुनिकैर्विद्वद्भिरुपन्यस्ता धातवः

इत्थम् अशेषधातूनां सङ्ग्रह एव तस्योद्देश्यमिति प्रतीयते। अत्र धात्वनुक्रम-णिकामतिरिच्यार्थानुक्रमणिकापि वर्तते। समेषाञ्चार्थानां पुरतस्तदर्थसम्बन्धिधातुसूच्या सह धातूनां स्रोतांस्यपि वर्तन्ते।

कार्यमिदमत्यन्तं व्यापकं परं कश्चिदेनां अर्थानुक्रमणिकां धातुगवेषणार्थमुपयुयुक्षते चेत्तत्र न्यूनताद्वयं वर्तते-

1. अत्र धातवोऽनुबन्धरहिता निर्दिष्टाः, किञ्च पाणिनीय-अष्टाध्यायी-पद्धत्या धातुरूप-सिद्ध्यर्थं सानुबन्धाः धातवः परमावश्यकाः। अतः पाणिनीयधातुरूपसिद्ध्यर्थं अनुक्रमणिकेयम् अनुपयुक्ता प्रतीयते।

2. अत्र अनुक्रमणिका अर्थाधारेण अकारादिक्रमेण विद्यते। किन्तु सङ्गणक-भाषाविज्ञाने शब्दार्थनिर्णयसम्बन्धितस्य कस्यापि कार्यस्य कृते धात्वाधारेणानुक्रमणिकाया आवश्यकता वर्तते।

किञ्च, धातुरूपसाधकानां सूत्राणां धातुपाठस्य च मध्येऽभिन्नसम्बन्धात् विभिन्नधातुपाठानामेकत्र स्थापनमार्थिकदृष्ट्या सङ्गच्छते न तु धातुरूपसाधनदृष्ट्या।

## 3. विद्युतरूपेण सङ्कलिता धातुवृत्तयः

प्रौद्योगिकक्षेत्रस्य विकासः धातुवृत्तीनां तुलनात्मकमध्ययनं सरलीकरोति। प्रौद्योगिकी सुविस्तारेण विविधैः परिप्रेक्ष्यैः धातुवृत्तीनामध्ययनं सुकरं करोति। विद्युतरूपेण वर्तमानानां विभिन्नधातुवृत्तीनां सङ्कलनं कृत्वा अन्वेषणस्य सौविध्यं प्रकल्पयितुञ्चास्माभिरधोलिखिताः पाणिनीयधातुवृत्तयश्चिताः।

1. माधवीया (गुप्तः, १९९१), 2. क्षीरतरङ्गिणी (मीमांसकः, २००५),
3. धातुप्रदीपः (मीमांसकः, १९८६) च

प्रायश सर्वा इमा धातुवृत्तयो द्वादशशताब्दी-चतुर्दशशताब्द्योर्मध्यकाले लिखिताः। सायणो माधवीयधातुवृत्तिं लिलेख चतुर्दशशताब्द्याः उत्तरभागे विजयनगरस्य महाराजेन हरिहरो बुक्केनाश्रयदातावास्ताम्। काश्मीरदेशवास्तव्यस्य क्षीरतरङ्गिणी-कारस्य क्षीरस्वामिनः कालो द्वादशशताब्द्याः पूर्वभागः परिकल्प्यते। धातुप्रदीपञ्च बङ्गदेशीयो विद्वान् मैत्रेयरक्षितो द्वादशशताब्द्याः अपरभागे चकार।

विभिन्नधातुवृत्तिषूपवर्णिता धातवो न केवलं परस्परं बेभिद्यन्तेऽपितु पाणिनीयधातुपाठादपि बेभिद्यन्त इति सुज्ञातं विद्वद्भिः। यथा, ब्रह्मदत्तो जिज्ञासुः (१९७९) "उपदेशेऽजनुनासिक इत्" (अ. १.३.२) इति सूत्रभाष्ये वर्णयति यत् पाणिनिना सानुनासिका धातवः पठिताः किन्तु अद्यत्वे निरनुनासिका एव धातव उपलभ्यन्ते।

यथाऽऽह शार्फः- वर्णविन्यासप्रकार-वर्णवैशिष्ट्यकारणता-लोकसंस्कृतप्रयोगः इत्यादिभिः कारणैः सङ्गृहीतस्वरूपाणां धातूनां सर्वे परम्परापाठाः सामान्यं प्राप्ताः। धातुवृत्तिषूपवर्णिता धातवो अधोलिखितविषयेषु विसंवदन्ते

1. धातूनां वर्णविषये 2. धात्वर्थविषये
3. गणविभागविषये 4. स्वरादिविषये

## 4 मानकरूपत्वम्

तत्रैतासां धातुवृत्तीनां समन्वयार्थं, धातूनां तदर्थानाञ्च निर्देशाय काचित् सरूपा शैली अनुसरणीया सर्वास्वेतासु धातुवृत्तिषु।

## 4.1 धातूनां मानकरूपत्वम्

शार्फमहोदयः (Scharf, 2009) तदीये माधवीय-धातुवृत्तेः डिजिटल- (digital) संस्करणे अष्टाध्यायीसूत्राधारेण प्रमाणीकृतं धातूनां मानकरूपं प्रस्तौति। तदर्थं तेन -

1. अनुबन्धानां यथास्थानमङ्कनम्
2. उदात्तत्त्वादीनां यथोचितनिर्देशनम्
3. धातुषु वर्णादीनां यथास्थानमङ्कनम् -
   a. धात्वादी षकारणकारौ, यथा - ष्वद, णम
   b. धात्वादिषकारोत्तरवर्त्ती टवर्गः, यथा ष्टक
   c. तालव्यानुनासिकस्य-ञकारस्य स्थाने दन्त्यनकारः, यथा अन्चु
   d. अनुनासिकस्य स्थाने दन्त्यनकारः, यथा दन्श
   e. उपधाशकारः, यथा व्रश्च इत्यत्र (तालव्योष्मा शकारः)
   f. उपधादकारः, यथा अद्ड्
   g. छकारपूर्वस्य चकारस्याभावः, यथा प्रछ

तत्राऽष्टाध्यायीसूत्राणि तावद् यदा मानकरूपेण वर्त्तमानेषु धातुषु प्रयुज्यन्ते, (तदा तानि धातुरूपप्रक्रियायां तान् तान् धातून् मानकीकुर्वन्ति)। धातूनां सङ्गृहीतमानकस्वरूपं शब्दसिद्धिप्रक्रियायां निर्दुष्टतां निश्चेतुमावश्यकम्। कतिपयेषु स्थलेषु धातुवृत्तयो धातून् तेषां मानकरूपेण न निर्दिशन्ति परन्तु वृत्तिषु सङ्गृहीतमानकस्वरूपस्य निश्चयार्थं तत्सम्बद्धसूत्राणाम् उल्लेखं कुर्वन्ति। यदि वृत्तिकाराः सङ्गृहीतमानकस्वरूपं नाऽमंस्यन्त तर्हि वृत्तिषु तन्नाकरिष्यन्। कृतं तु सूचयति तेऽपि धातूनां मानकरूपं मन्यन्ते। अतो वृत्तयः सङ्गृहीतमानकस्वरूपं समर्थयन्तीति तथ्यमिदमाधारीकृत्य वयं ऊहितुं शक्नुमो यद् वृत्तिषु यदा धातूनां सङ्गृहीतमानकस्वरूपं विना निर्देशः प्राप्नोति तदा तत्र उच्चारण-सौविध्यार्थं मन्दबुद्धिप्रतिपत्यर्थं वा तथा निर्देशः कृत इति। अतो नैकानां धातुवृत्तीनां सम्बन्धस्थापनार्थं तत्रस्थानां धातूनां सङ्गृहीतस्वरूपाणां साम्यमुचितम् इति मन्यामहे।

## 4.2 अर्थानां मानकरूपम्

सामान्येन क्रियावाचकशब्दे सप्तमीविभक्त्या अर्थनिर्देशः क्रियते, यथा - पूजने, गतौ, चेष्टायाम् इत्यादि। कदाचिद् क्रियावाचकशब्दानन्तरम् अर्थशब्दोऽपि दृश्यते, यथा- गत्यर्थाः, भाषार्थाः, क्षरणार्था इत्यादि। तथा वृत्तिकारैः तत्र-तत्र विविधाः कृत्प्रत्याः क्रियानिर्देशार्थं प्रयुज्यन्ते। तत्र तैः केषुचिद् धात्वर्थेषु घञा निर्देशो व्यधायि केषुचित् च ल्युटा। तत्र परस्परं सम्बन्धं कर्तुं प्रत्येकं धातोः कृते यद्रूपमधिकासु वृत्तिषु लब्धं तदेवास्माभिमानकरूपेण गृहीतम्।

धातुवृत्तीनां तुलनात्मकाध्ययने अस्माभिः त्रिषु धातुवृत्तिषु विद्यमानधातुसम्बद्धाः अङ्किताः सूचना अधोलिखिताः सन्ति ।

1. धातौ इत्-निर्देशः
2. अर्थः
3. अर्थविश्लेषणम्
4. धातुसम्बन्धिनो गणस्य नाम
5. स्वरः
6. पदम् (आत्मनेपदं, परस्मैपदम् उभयपदं वा)
7. सेडनिट्त्वम्
8. पाणिनीयसूत्राणि
9. कारिका:

तदतिरिच्य वृत्तिषु परस्परं सम्बन्धं स्थापयितुं प्रत्येकं धातोः सङ्गृहीतमानक-स्वरूपं तदर्थश्च सप्तम्यैकवचनान्तेनातिरिक्ततया निर्दिश्येते । वृत्तित्रयं परस्परं संयोक्तुं तुलनात्मकाध्ययने इमाः पाठसूचिकाः प्रयोक्ष्यन्ते ।

## 5. धातुवृत्तीनां तुलना

धातुवृत्तिषु एकोऽनेके वा धातव एकेनाऽनेकैर्वा तदर्थैः सह निर्दिश्यन्ते । यतो हि धातुवृत्तयोधातुनिर्देशेतदर्थनिर्देशेचोभयत्रबेभिद्यन्ते,अतःतासांतुलनात्मकाऽध्ययनकाले प्रत्येकं धातूनां प्रविष्टि एकेन धातुना एकेनैव चार्थेन सह नैकासु प्रविष्टिषु विस्तारिता । इत्थं यदि तत्र कस्याञ्चिद् धातुवृत्तौ काचित् प्रविष्टिः ‘n’- सङ्ख्यात्मकैः धातुभिः (धातु1 , धातु2, ..., धातुn ‘n’-सङ्ख्यात्मकैः सम्भावितैर्धात्वर्थैः सह ( अर्थ1 , अर्थ२, ..., अर्थn) वर्तते तर्हि सा प्रविष्टिः धातु (1....n) अर्थ (1.....n) इत्यनेन धातु-धात्वर्थ युग्मरूपेण पृथक्कृता । यथा -

गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च इत्येवम्प्रकारका प्रविष्टिः त्रिषु प्रविष्टिषु विस्तारिता । ताश्च-

धातु1 * अर्थ1-3=[धातु1*अर्थ1, धातु1*अर्थ2, धातु1*अर्थ3]
गाधृ प्रतिष्ठायाम्,
गाधृ लिप्सायाम्,
गाधृ ग्रन्थे च ।

एवमेव कुथि, पुथि, लुथि, मथि, मन्थ हिंसासङ्क्लेशनयोः इत्यस्य

धातु1-5*अर्थ1-2=[धातु1*अर्थ1, धातु1*अर्थ2, धातु2*अर्थ1, धातु2*अर्थ2, धातु3*अर्थ1, धातु3*अर्थ2, धातु4*अर्थ1,

धातु4*अर्थ2, धातु5*अर्थ1, धातु5*अर्थ2]

| | |
|---|---|
| कुथि हिंसायाम्, | कुथि सङ्क्लेशने, |
| पुथि हिंसायाम्, | पुथि सङ्क्लेशने, |

लुथि हिंसायाम्, लुथि सङ्क्लेशने,
मथि हिंसायाम्, मथि सङ्क्लेशने,
मन्थ हिंसायाम्, मन्थ सङ्क्लेशने।

अधोनिर्दिष्टा प्रथमातालिका प्राक्तनानां उक्तपृथक्करणानन्तरं च प्राप्तानां प्रविष्टीनां सङ्ख्यां दर्शयति।

| धातुवृत्तिः | यथानिर्दिष्टानि धात्वर्थयुग्मानि | पृथक्कृतानि धात्वर्थयुग्मानि |
|---|---|---|
| माधवीया | १५७६ | २१८९ |
| क्षीरतरङ्गिणी | १५८१ | २१६४ |
| धातुप्रदीपः | १६३० | २२५० |

तालिका १

अधोनिर्दिष्टद्वितीयतालिकायां वृत्तिषु दशगणेषु विद्यमानाः धातवः प्रदर्श्यन्ते।

| गणः | माधवीया | क्षीरतरङ्गिणी | धातुप्रदीपः |
|---|---|---|---|
| भ्वादिः | ९७८ | ९९५ | १०३१ |
| अदादिः | ७२ | ६९ | ७२ |
| जुहोत्यादिः | २४ | २५ | २६ |
| दिवादिः | १३६ | १३४ | १३९ |
| स्वादिः | २९ | २९ | ३१ |
| तुदादिः | १५७ | १५९ | १६८ |
| रुधादिः | २५ | २५ | २५ |
| तनादिः | १० | ०९ | १० |
| क्र्यादिः | ६० | ६० | ६४ |
| चुरादिः | ३९९ | ३८१ | ३८६ |

तालिका २

केचन धातवो बहुभिरर्थैर्युक्ता भवन्ति। न च प्रत्येकं वृत्तिः सर्वानर्थान् स्वीकरोति। अतोऽस्माभिर्धातोस्तदर्थस्य च युग्मानाधारीकृत्य वृत्तीनां तुलना व्यधायि। निम्नलिखित-तृतीयतालिकायां विविधवृत्तिषु विविधेषु गणेषु विद्यमानानां धातु-अर्थयुग्मानां सङ्ख्या प्रदर्श्यते। किञ्च तत्र समानाः प्रविष्टयः इत्यस्मिन्स्तम्भे सर्वासां वृत्तीनां प्रत्येकं गणे विद्यमानानां समानानां धातु-अर्थयुग्मानां सङ्ख्याऽपि प्रदर्श्यते। तत्र प्रथम-सङ्ख्या

केवलं धातु-अर्थ-गणविषयमाधारीकृत्य प्राप्तं साम्यं दर्शयति। द्वितीया सङ्ख्या च सेट्, अनिट्, पदविषयकं साम्यं प्रदर्शयति। अस्माभिरभ्युपलक्ष्यते यत् एतस्याः तुलनाऽन्तरं दशमे गणे धातु-अर्थ-गणविषयिका नैकापि प्रविष्टिः समाना इति।

| गणः | माधवीया | क्षीरतरङ्गिणी | धातुप्रदीपः | समानाः प्रविष्टयः |
|---|---|---|---|---|
| भ्वादिः | ११६५ | ११७६ | १२११ | ८४८/८७० |
| अदादिः | ८२ | ७८ | ८५ | ६७/७० |
| जुहोत्यादिः | ३२ | ३४ | ३४ | ३/२८ |
| दिवादिः | १५७ | १५० | १६० | १०९/११५ |
| स्वादिः | ३७ | ३५ | ३९ | २९/२९ |
| तुदादिः | १७६ | १७५ | १८७ | १२८/१३२ |
| रुधादिः | ३२ | ३१ | ३२ | २२/२८ |
| तनादिः | १० | ०९ | ११ | ७/७ |
| क्र्यादिः | ६८ | ६८ | ७१ | ४८/४८ |
| चुरादिः | ४३० | ४१७ | ४१९ | ०/२३१ |
| आहत्य | २१८९ | २१६४ | २२५० | १२६१/१५५८ |

तालिका ३

तिसृषु धातुवृत्तिषु धातु-अर्थ-गणविषयं साम्यं केवलं ११३८ (३५%) सङ्ख्यात्मिकासु प्रविष्टिष्वेव प्राप्तम्। तत्र २३१ सङ्ख्यात्मिकाः सेडनिट्पदविषयिकाश्चुरादिगणीयाः प्रविष्टयः केवलं समानाः सन्ति। सामान्यघटकानाम् अर्थात् धातु-अर्थ-गणविषयकतुलनायां साम्यमत्यल्पमिति चिन्त्योऽयं विषयः। तथा च प्रविष्टिष्वसमानतानां कारणानां परिशोधनमपि आवश्यकम् वर्तते। २०६५ सङ्ख्यात्मिकाः प्रविष्टयोऽधोलिखितेषु पक्षेषु एकस्मिन् नैकस्मिन् वा पक्षे असमानाः, यथा -

**क. धातुभेदः**

धातुषु प्रायशः ह्रस्वदीर्घकारणात् समानध्वनेः समानलेखनशैल्या वा भेदाः दरीदृश्यन्ते। यथा-

ह्रस्वदीर्घ-कारणाद्दृष्टाः भेदाः- पृचि-पृची, वृजि-वृजी, मुष-मूष, गु-गू, कृ-कॄ, नृ-नॄ।
समानध्वनेः दृष्टाः प्रभेदाः- रुश-रुष, ह्लाद-ह्राद, ब्ली-व्ली, वल्ह-बल्ह, षेवृ-षेबृ।
समानलेखनशैल्या प्राप्ताः प्रभेदाः चः- खच-खव, स्फुर-स्फुल, जेहृ-जेह्र इत्येवमादयः।

**ख. अर्थभेदः**

अर्थे तावत् भेदाः मुख्यतया समानध्वनेः समानलेखनशैल्या वा प्रतिभान्ति। यथा-

समानध्वनेः दृष्टाः भेदाः - आप्रवणे-आप्लवणे, म्रक्षणे-म्लक्षणे।

समानलेखनशैल्या प्राप्ताः प्रभेदाः- सेवने-सेचने, भाषणे- भासने इत्येवमादयः।

**ग. गणभेदः**

प्रायशः १०% भेदाः गणभेदकारणात् सन्ति। तत्कारणाद्दृष्टानां विविधप्रकारकाणां भेदानां काश्चन प्रविष्टय उदाहरणरूपेणाऽधस्ताद् दीयन्ते।

**सर्वासु वृत्तिषु अनुपलब्धा धातवः**

| गणः | धातुः | अर्थः | माधवीया | क्षीरतरङ्गिणी | धातुप्रदीपः |
|---|---|---|---|---|---|
| भ्वादिः | भ्रक्ष | अदने | - | X | - |
| अदादिः | पिजि | वर्णे | X | - | X |
| अदादिः | णिसि | गतौ | - | - | X |
| जुहोत्यादिः | गॄ | क्षरणे/दीप्तौ | - | - | X |
| जुहोत्यादिः | कित | ज्ञाने | - | X | X |
| तनादिः | ऋणु | दीप्तौ | - | - | X |
| स्वादिः | रि | हिंसायाम् | X | - | X |

तालिका ४

**ध्वनि-धातु-अर्थसम्बन्धिविविधता**

| गणः | माधवीया | क्षीरतरङ्गिणी | धातुप्रदीपः |
|---|---|---|---|
| अदादिः | पृची सम्पर्चने | पृची सम्पर्के | पृजी सम्पर्के |
| अदादिः | षस स्वप्ने | षस स्वप्ने | षस ष्वप्ने |

तालिका ५

**धात्वर्थसम्बन्धिविविधता**

| गणः | माधवीया | क्षीरतरङ्गिणी | धातुप्रदीपः |
|---|---|---|---|
| अदादिः | कसि शासने | कसि शासने | कसि निशाने |
| अदादिः | दिह उपचये | दिह उपचये | दिह उपतापे |
| क्र्यादिः | भ्री भये | भ्री भरणे | भ्री भरणे |

तालिका ६

## 6 इडुपग्रहविषयकभेदः

उपग्रहस्य इट्त्वस्यानुज्ञानं वृत्तिषु स्वरानुसारेणापि भवति। धातुषु स्वरनिर्देशात् पूर्वं धातुपाठः सस्वर आसीदित्यनुमीयते। परन्तु कालान्तरे स लुप्तः। धातुस्वरविषयकज्ञानमस्माभिः सम्पूर्णतया धातुवृत्तीनामाधारेणैव पुनर्लभ्यते। परन्तु वृत्तीनामालोडनेन प्रस्फुट्यते यत् कस्यांश्चिदपि धातुवृत्तौ स्वरविषयकज्ञानं पूर्णतां नैति। क्वचित् केवलं उपग्रहत्वं क्वचिच्च इड्विषयत्वमेव प्रदर्श्यते। तथा च क्षीरतरङ्गिण्यां क्षीरस्वामिना अनेकत्र उपग्रहत्वं नोल्लिख्यते यतो हि अनुबन्धत्वात् स्वयमेव उपग्रहविषयको बोधो जायते। यथा- "स्वरितञितः कर्त्रभिप्राये क्रियाफले" (पा० १.३.७२) ञिदित्वात् उभयपदित्वम्। अतः क्षीरस्वामी 'पूञ् पवने', 'मीञ् हिंसायाम्' इत्यादिषु उपग्रहत्वं नोल्लिखति। तथा च "अनुदात्तङित आत्मनेपदम्" (पा०१.३.१२), "शेषात् कर्तरि परस्मैपदम्" (पा०१.३.७८) इत्यादिभिः सूत्रैरस्माभिः 'इङ् अध्ययने', 'कुङ् शब्दे', 'द्यु अभिगमने' इत्यादिषु प्रत्येकं धातोरुपग्रहविषयकज्ञानं प्रस्फुटत्येव। वृत्तिषु उट्टङ्किता सेट्त्वानिट्त्वोपग्रहत्वभिन्नता अध उद्ध्रियते-

**उपग्रहत्वइट्त्वसम्बन्धिविविधता**

| **धातुः** | **अर्थः** | **गणः** | **इड्विधिः** | **उपग्रहः** | **वृत्तिसङ्ख्या**[2] |
|---|---|---|---|---|---|
| अणँ | प्राणने | दिवादिः | अनिट् | आ.प. | ८१६, -, - |
| | | | सेट् | आ.प | -, -, ८५६ |
| चक्षिङ् | व्यक्तायां वाचि | अदादिः | अनिट् | आ.प. | ६६७,६९१, - |
| | | | सेट् | आ.प | -, -, ७०५ |
| ञिश्विदाँ | अव्यक्तशब्दे | भ्वादिः | अनिट् | प.प | -, -, ६६७ |
| | | | सेट् | प.प | ६२९,६५४, - |

तालिका ७

## 7 अनुबन्धविषयकभिन्नता

वृत्तिषु अनुबन्धविषयेऽपि विविधतामन्वभवाम। अनुबन्धभिन्नतायां सत्यां धातुरूपसिद्धावपि भिन्नता परिलक्ष्यते। विविधवृत्तिषु अनुबन्धविषयिकास्त्रिप्रकाराः भिन्नता अभिलक्षिता।

### 7.1 अजनुबन्धमधिकृत्य प्राप्ताः भेदाः

अधः उद्ध्रियमाणानि उदाहरणानि विविधवृत्तिष्वनुबन्धमधिकृत्य धातुषु प्राप्तभेदानां भिन्नतासङ्गृहीतानि।

**7.2 अकार-इकारानुबन्धकृतभेदः**

डपँ, डपिँ डिपँ, डिपिँ कडँ, कडिँ
क्रडँ, क्रडिँ क्लडँ, क्लडिँ चुटँ, चुटिँ
शुठँ, शुठिँ...,

**7.3 अकार-उकारानुबन्धकृतभेदः**

क्षीवँ, क्षीवु चनँ, चनुँ
जसँ, जसुँ ऋणँ, ऋणुँ...,

**7.4 अकार-ईकारानुबन्धकृतभेदः**

जभँ, जभीँ

**7.5 अकार-उकार-ऋकारानुबन्धकृतभेदः**

चीवँ, चीवृँ माहँ, माहृँ मृधुँ, मृधृँ....,

**7.6 ञकारानुबन्धकृतभेदः**

धातुवृत्तिषु केचन धातुवृत्तिकाराः "शॄञ्वॄञ्" इति पठन्ति केचन च "शॄ, वॄ" इति। अतः रूपसिद्धौ ञकारानुबन्धे सति "स्वरितञितः० (पा० १.२.७२) इत्यनेन आत्मनेपदं प्राप्नोति शेषत्वाच्च परस्मैपदम् । ञकारानुबन्धाभावे च शेषत्वाच्च परस्मैपदमेव।

**7.7 टुकार-डुकारानुबन्धकृतभेदः**

क्षीरतरङ्गिण्यां क्षीरस्वामिना "याचिः" "डुयाचृँ" इति 'डु' अनुबन्धसहितः पठितः । मैत्रेयसायणाभ्याञ्च "टुयाचृँ" इति "टु" अनुबन्धसहितः । अतः रूपसिद्धौ डुयाचृ ड्वित्कृतानि "ड्वितः क्त्रिः" इत्यादीनि कार्याणि प्राप्नोति, टुयाचृ च ट्वित्कृतानि "ट्वितोऽथुच्" इत्यादीनि । मैत्रेयसायणावपि क्षीरस्वामिमतमङ्गीकृत्य 'डु' इत्यनुबन्धोऽपि स्वीकरणीय इति धातुवृत्तौ स्पष्टतया उक्तवन्तौ। परन्तु पाणिनीयधातुपाठे तु "टुयाचृ" 'टु' इत्यनुबन्धसहित एव उपलभ्यते।

## 8 धात्वर्थसमुदायः

पाणिनीयधातुपाठस्य विभिन्नवृत्तिषु प्रत्येकं प्रविष्टिषु एकेऽनेके वा धातव एकेनाऽनेकैर्वा तदर्थैः अन्तर्विष्टा वर्तन्ते। अत्र न केवलं धातुसूत्राणि अर्थस्यैव प्रतिपादनं

कुर्वन्ति अपितु अर्थेष्वन्तर्निहितं धातुमप्यभिवर्णयन्ति । तेन एकः धात्वर्थसमुदायः उत्सृज्ज्यते । येन प्रत्येकं धातोः अर्थेषु विद्यमानानां धातूनां अर्थोऽपि अवबुध्यते । अर्थविश्लेषणमपि उद्गच्छति । वृत्तिषु एतादृशाः अन्योन्यमाश्रिताः परिमण्डलाकृतयः बहवो धातवः परिलक्षिताः । द्वित्राणि उदाहरणान्यपि “पल्सुलेमहाभागैः” प्रसूच्यन्ते । यथा- पालँ रक्षणे; रक्षँ पालने । अस्माभिस्तु सङ्गणकमाध्यमेन विस्तारोपरान्ते प्राप्ताः केचन विश्लेषणसमुदाया अधः प्रस्तूयन्ते ।

भू; असँ :: भू सत्तायाम् ; असँ भुवि
रक्षँ; पालँ :: रक्षँ पालने ; पालँ रक्षणे
अदँ; भक्षँ :: अदँ भक्षणे ; भक्षँ अदने
चलँ; कपिँ :: चलँ कम्पने ; कपिँ चलने
ओँलस्जीँ; व्रीडँ :: ओँलस्जीँ व्रीडायाम् ; व्रीडँ लज्जायाम्
कुपँ; क्रुधँ :: कुपँ क्रोधे ; क्रुधँ कोपे
स्मृ; चितिँ :: स्मृ चिन्तायाम् ; चितिँ स्मृत्याम्
ईशँ; दृशिँर् :: ईशँ दर्शने ; दृशिँर् प्रेक्षणे
ईरँ; क्षिपँ :: ईरँ क्षेपणे ; क्षिपँ प्रेरणे
प्रीञ्; तृपँ :: प्रीञ् तर्पणे ; तृपँ प्रीणने
वृणँ; वृञ :: वृणँ आवरणे ; वृञ् वरणे
आप्लृ; डुलभँष् :: आप्लृँ लम्भने ; डुलभँष् प्राप्तौ

कदाचित् धातुषु केचन धात्वर्थेषु विद्यमानस्य धातुः तस्य च धातोः अर्थः एवं समुदायेन कदाचित् एकस्य धातोः अर्थे विद्यमाननिहितः धात्वाधारेण अपरधात्वर्थः एवं क्रमः अग्रे प्रचलित्वा एका शृङ्खला इवाऽभिलक्ष्यते । एतादृशशृङ्खलानुक्रमं अर्थविश्लेणपरिज्ञानाय उपयुक्तं भवति । इत्थं शृङ्खला निर्माणस्याप्युदाहरणान्यधः प्रस्तूयन्ते-कदाचित्

पर्षँ स्नेहने; ष्णिहँ प्रीतौ; प्रीञ् तर्पणे; तृपँ प्रीणने;
विदँ वेदनायाम्; विद्लृँ लाभे; डुलभँष् प्राप्तौ; आप्लृँ लम्भने;
गर्तँ कुत्सायाम्; कुत्सँ अवक्षेपणे; क्षिपँ प्रेरणे; ईरँ क्षेपणे ;
चडिँ कोपे; कुपँ क्रोधे; क्रुधँ कोपे;
विलँ चसने; चषँ भक्षणे; भक्षँ अदने; अदँ भक्षणे;
ह्रीछँ लज्जायाम्; ओँलस्जीँ व्रीडायाम्; व्रीडँ लज्जायाम्;

गर्हँ निन्दने; णिदिँ कुत्सायाम्; कुत्सँ अवक्षेपणे; क्षिपँ प्रेरणे; ईरँ क्षेपणे ;
कडँ घसने; घस्लृँ अदने; अदँ भक्षणे; भक्षँ अदने;
त्रपूँष् लज्जायाम्; ओँलस्जीँ व्रीडायाम्; व्रीडँ लज्जायाम्;

अन्ततो गत्वा क्वचित् धातुसूत्रेषु एकस्य धातोः अर्थः तस्यैव धातुना अभिवर्णितः। यथा- तुडँ तोडने, जनँ जनने, दाण् दाने, रुषँ रोषे, दीपीँ दीप्तौ, भक्षँ भक्षणे इत्यादि।

## 9 सोपसर्गाः धातवः

“उपसर्गेण धात्वर्थः बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्” ॥ (बृहत् संस्कृताभिधानम् -पृ.१३३५)[3]

इत्यनेन ज्ञायते उपसर्गो धात्वर्थं परिवर्तयतीति। एवं ननु धातुपाठे प्रायशः धातवः अनुपसर्गा एवोपलभ्यन्ते अपितु क्वचित् सोपसर्गाऽपि धातवः दरीदृश्यन्ते, यथा- सङ्ग्राम, व्यय, वीर, इत्यादयः। अत्र “पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण” इति परिभाषया सङ्ग्रामादि सोपसर्गधातूनामपि अटि अनिष्टरूपापत्तिरिति तदत्यल्पमुक्तमित्या-क्षिप्य महाभाष्यकारैः उच्यते “भृशादिभ्यो भुव्यच्० (अ.३.१.१२) इत्यस्मिन् सूत्रभाष्ये “अड्ल्यप्द्विर्वचनेष्विति वक्तव्यम्” (अष्टा० ३/१/१२) इति वार्तिकेन ज्ञाप्यते यत् सोपस-र्गात्सङ्घातात्प्रत्ययोत्पत्तिस्तेन उपसर्गात्पूर्वमडादिप्रत्ययोत्पत्तिरिति। सङ्ग्रामादि व्यतिरिक्तधातुषु भाष्योक्तपरिभाषाद्वयाधारेण[4]

- **अड्विषये**

“लुङ्लङ्लृङ्क्ष्वडुदात्तः” (अष्टा० ६/४/७१) इति सूत्रेण त्रिषु लकारेषु अडागमो भवतीति अड्विषये धातूनां पूर्वमुपसर्गयोगे प्रति+गम्लृँ --> अप्रतिगच्छत् इति अनिष्टं रूपं प्राप्नोति। किन्तु पूर्वं साधनयोगे प्रति+अगच्छत् --> प्रत्यगच्छत् इति इष्टं रूपं प्राप्नोति।

- **ल्यब्विषये**

“समासेऽनञ्पूर्वे क्त्वो ल्यप्” (अष्टा० ७/१/९३) इति सूत्रेण पूर्वं धातुः साधनेन युज्यते इत्यस्मिन् पक्षे नञ्-भिन्न समासे क्त्वो ल्यपि सति ‘आगत्य आगम्य’ इति इष्टरूपद्वयसिद्धिः। किन्तु पूर्वं धातुरुपसर्गेण युज्यते इत्यस्मिन् पक्षे उपसर्गस्य धात्वनुप्रवेशात् तद्व्यतिरिक्तपदाभावात् समासाभावात् ल्यबभावात् आङ्+गम्लृँ + क्त्वा --> आगत्वा इत्यनिष्टरूपं सिध्यति। पूर्वं सामान्यः गम्लृ धातोः क्त्वा प्रत्यये सति-

गम्लृँ +क्त्वा --> गत्वा। परन्तु उपसर्गयोगे तु गम्लृ धातोः क्त्वा स्थाने ल्यब् भूत्वा आङ् + गम्लृँ --> आगत्य इति सिध्यति न तु आगत्वा।

- **द्विर्वचनविषये (सन् प्रत्यये)**

द्विर्वचनविषये अपि पूर्वं धातुरुपसर्गेण युज्यते इत्यस्मिन् पक्षे प्रति+गम्लृँ+सन्-> पिप्रतिगमिषति इति अनिष्टरूपापत्तिः किन्तु धातुः पूर्वं साधनयोगे सति प्रति + जिगमिषति--> प्रतिजिगमिषतीति इष्टरूपसिद्धिः।

सोपसर्गस्य सङ्ग्रामधातौ एतद्दोषापहरणाय भाष्यकारेण पतञ्जलिना (अष्टा० ३/१/१२) इत्यस्मिन् सूत्रभाष्यव्याख्याने 'अवश्यं सङ्ग्रामयतेः सोपसर्गादुत्पत्तिर्वक्तव्या "असङ्ग्रामयत शूर" इत्येवमर्थम्' इत्युक्तम्। यद्यप्यत्र केवलसङ्ग्राम धातुनिर्देशत्वं दृश्यते तथापि एवं सदृशीनां 'सङ्ग्राम', 'वीरँ' इत्यादिधातूनाम् उपलक्षणग्रहणार्थमिति 'युधिष्ठिरमीमांसकैः' उल्लिख्यते।

धातुपाठे उपलब्धां सोपसर्गधातुसूचीं काचित् प्रसूचयिष्यते।

सङ्ग्रामँ = ( सम् + ग्राम) युद्धे
व्ययँ = ( वि + अयँ) वित्तसमुत्सर्गे
वीरँ = ( वि + ईरँ) विक्रान्तौ
निवासँ = ( नि + वासँ) आच्छादने
सङ्केतँ = ( सम् + केतँ) आमन्त्रणे
व्युषँ = ( वि + उषँ) दाहे

उपसर्गसंयोगेन न केवलं धात्वर्थः अपितु उपग्रहत्वमपि 4 परिवर्त्यते। अतो धातुवृत्तीनां सङ्कलनेन सहैव सर्वेषां धातूनां सर्वैः सम्भावितैरुपसर्गैर्युक्तानां धातूनां विद्युद्रूपयुक्तायाः व्यापकसूच्याः निष्पादनस्यावश्यकतापि वर्तते।

## 10 धातुवृत्तिष्वनिर्दिष्टार्थाः धातवः

उपर्युक्तेषु त्रिषु धातुवृत्तिषु एकस्यां धातुवृत्तौ क्वचित् धातुसूत्रेषु वृत्तिकारैः अर्थाननुक्त्वा "इत्येके, इत्यन्ये, इत्यपरे..." इत्यादिशब्दैर्योगे धात्वर्थनिर्देशः क्रियते। तथैव अन्यस्यां वृत्तौ च तस्य एव धातोः अर्थनिर्देशः कृतः। यथा-"खव इत्येके" (धातुप्र० 1184/1565) धातुं मैत्रेयरक्षितः धातुप्रदीपे पठति। अत्र खव इति धातुं इत्येके इत्युक्त्वा त्यक्तमस्ति। एते एके के? खव धातोश्च कः अर्थः इति विचारयामश्चेत् ज्ञायते यत् अस्य धातोः अपि 'भूतप्रादुर्भाव' इत्येव अर्थः भवितुमर्हतीति। यतो हि क्षीरतरङ्गिण्यां "खव भूतप्रादुर्भावे" (क्षीर० 1145/1503) इत्यर्थः प्राप्यते, अन्यश्च माधवीये अपि खच इति

धातु-व्याख्याने 'खव इत्येके' मैत्रेयः इत्युक्त्वा मैत्रेयमतमपि स्थापयति सायणः । तेन सायणोऽपि अत्र धातुभेदं मन्यते न तु अर्थभेदम् । परिशेषन्यायेन 'खव' धातोः 'भूतप्रादुर्भाव' इत्यर्थः स्यात् । एवं अकथितार्थाः धातवः धातुप्रदीपे २५ सङ्ख्याकाः लब्धाः । प्रत्येकस्य अनुक्तार्थस्य धातुसूत्रस्य धातुः, अर्थः, गणः, वृत्तिसङ्ख्या, धातुसङ्ख्या च अधः प्रस्तूयन्ते ।-

| | | | | |
|---|---|---|---|---|
| 1. क्र्यादिगणः | खवँ | इत्येके | भूतप्रादुर्भाववर्थे | 1184/1565 |
| 2. क्र्यादिगणः | चॄ | इत्येके | वयोहानावर्थे | 1147/1525 |
| 3. क्र्यादिगणः | न्वी | इत्येके | नयर्थे | 1149/1527 |
| 4. क्र्यादिगणः | मॄ | इत्येके | हिंसायामर्थे | 1153/1531 |
| 5. चुरादिगणः | कुशूल | इत्येके | क्रीडायाम् | 1443/1888 |
| 6. चुरादिगणः | लजि | इत्येके | प्रकाशने | 1478/1929 |
| 7. चुरादिगणः | वटि | इत्येके | प्राणने | 1478/1928 |
| 8. चुरादिगणः | श्वठि | इत्येके | संस्कारगत्योः | 1213/1598 |
| 9. चुरादिगणः | स्मिङ् | इत्येके | अनादरे | 1220/1607 |
| 10. तुदादिगणः | खुड | इत्येके | संवरणे | 1041/1413 |
| 11. तुदादिगणः | छुड | इत्येके | संवरणे | 1041/1414 |
| 12. तुदादिगणः | ध्रुड | इत्यपरे | निमज्जने | 1049/1424 |
| 13. तुदादिगणः | ब्रुड | इत्येके | सङ्घाते | 1043/1416 |
| 14. तुदादिगणः | भृड | इत्यप्येके | निमज्जने | 1048/1423 |
| 15. तुदादिगणः | भ्रुड | इत्येके | सङ्घाते | 1043/1417 |
| 16. तुदादिगणः | लुड | इत्येके | संस्लेशने | 1034/1405 |
| 17. तुदादिगणः | स्फर | इत्येके | सञ्चलने | 1045/1419 |
| 18. भ्वादिगणः | उठ | इत्येके | उपघाते | 226/346 |
| 19. भ्वादिगणः | उहिर् | इत्येके | अर्दने | 475/753 |
| 20. भ्वादिगणः | क्लुङ् | इत्येके | गतौ | 647/979 |
| 21. भ्वादिगणः | खोऌ | इत्यप्येके | गतिप्रतिघाते | 357/563 |
| 22. भ्वादिगणः | ग्लह | इत्यप्येके | ग्रहणे | 420/662 |
| 23. भ्वादिगणः | तुहिर् | इत्येके | अर्दने | 475/752 |
| 24. भ्वादिगणः | मक्ष | इत्यप्येके | सङ्घाते | 431/676 |
| 25. स्वादिगणः | स्मृ | इत्येके | प्रीतिपालनयोः | 935/1282 |

अन्यवृत्तिद्वये अपि एतादृशानि द्वित्राणि उदाहरणानि प्राप्स्यन्ते

## 11. उपसंहारः

धातुवृत्तीनां समन्वयस्य सज्जीकरणाय कृतपूर्वप्रयासे कृतभूरिपरिश्रमिणः तासु विद्यमानान् भेदान् दृष्टिपथम् आनयन् । अद्यावध्यपि तासां केनाऽपि परिमाणात्मकं विवरणं न प्रस्तुतम् । किन्तु शोधपत्रेऽस्मिन्नस्माभिर्विविधप्रकारकाणां भेदानां परिमाणात्मकेन मानेन साकं तासां वृत्तीनां स्वरूपमपि परिकीर्तितम् । अनेन सहैव धातूनां धात्वर्थानाञ्च मानकरूपस्वीकारात्, एतासां धातुवृत्तीनां विद्युद्रूपेण संयोजनं कर्तुं वयं समर्थाः । पाणिनीयधातुपाठस्य पुनर्निर्माणमस्मदुद्देश्यं नास्ति, अपितु शोधार्थं 'समर्थ-डेटाबेस्' प्रकल्पनमेव । विविधासु वृत्तिषु वर्त्तमाना विविधतैव अस्माकं चिन्तायाः विषयः । वृत्तिषु सारूप्यम् ३५% मात्रमेव । एवं विद्युद्रूपेण सम्पादितमिदं संस्करणं भाषाविज्ञानदृष्ट्या विविधतायाः परिशीलने सहायकं भविष्यति । अस्माभिर्निर्मितस्य भेदानुसारक्रमविभक्तस्य विद्युल्लेखसङ्ग्रहस्य गवेषकयन्त्रस्य चोपलब्ध्या सम्भावित-धातूनां सम्प्रविभागस्याऽध्ययनमिदानीं सम्भवम् । तथापि धातुसम्बन्धितार्थविषये टिप्पणीं कर्तुम् आर्थिकदृष्ट्या (चिह्नितः) tagged corpus अपेक्ष्यतैव । विद्युद्धातुवृत्तय http://sanskrit.uohyd.in/scl/dhaatupaatha इत्यत्र अन्तराफलके ( interface) उपलभ्यन्ते ।

एतावति काले पाणिनीयात् पश्चाद्वर्तिविद्वद्भिर्व्याख्यातृभिश्च देशकालभेदानुसारेण धातुपाठे बहूनि पाठभेदानि सन्निवेशितानि । तानि पाठभेदानि प्रख्यातव्याकरणाचार्याः 'भागीरथप्रसादत्रिपाठी' महाभागाः तेषां 'पाणिनीयधातुपाठसमीक्षा' इत्यत्र ग्रन्थभूमिकायां व्यवृण्वन् । यथा- केचन पाठभेदा लिपिकानां भ्रान्त्या सञ्जाताः, केचन अनवबोधेन, केचन च देशभेदेनोच्चारणभेदाद्वा । यावन्तः पाठभेदा इह संल्लभन्ते न तावन्तो व्याकरणस्य कस्मिंश्चिदपि ग्रन्थे । इमाः सर्वाः पाठभ्रान्तयः शुशोधन्याः सन्ति । परन्तु व्याकरणं वस्तुतः प्रयोगमाश्रित्य प्रवर्तते । "प्रयोगशरणा वैयाकरणा" इति व्याकरणग्रन्थेषु उक्तिः सङ्गच्छते । ननु संस्कृतवाङ्मयादनुपलम्भादेव कमपि धातुमप्रामाणिकमङ्गीकर्तुं न शक्यते । महाभाष्यकृता तथ्यमिदं "सर्वे देशान्तरे" इति । अतो धातुपाठस्य प्रतताध्ययनार्थं संस्कृतग्रन्थानां प्रादेशिककोशानां वा प्रस्तुतिर्निकामम् अपेक्षणीयमित्यलम् । यदुक्तं महाभाष्ये "वेदानां रक्षार्थमध्येयं व्याकरणमिति" अतो वेदवद्धातुपाठोऽपि यत्नतः परिरक्षणीयः ।

## 12. आभारः

शार्फ (Scharf) महोदयेन माधवीयधातुवृत्तौ विहितं कार्यमस्य कार्यस्य मुख्याऽन्तर्दृष्टिः वर्तते । अस्माभिः प्रोग्रामिङ्ग (programming) सहायतार्थं

करुणाकराय, mark-up संरचनार्थं देवानन्दशुक्लाय, रामकृष्णमाचार्युलुमहोदयाय आचार्याय आनन्दप्रकाशमहोदयाय च पाणिनीयप्रक्रियया धातुरूपसिद्धौ बहुमूल्यचर्चार्थं मार्गदर्शनार्थञ्च धन्यवादाः समर्प्यन्ते ।

## References

1. Thesis: "Comparison of Paniniya Dhatuvrtties", Department of Sanskrit Studies, University of Hyderabad, Hyderabad, 2014
2. प्रथमः माधवीयधातुवृत्तेः सङ्ख्या, द्वितीयः क्षीरतरङ्गिण्याः तृतीयः धातुप्रदीपस्य सङ्ख्या च
3. श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण सङ्कलितम्
4. "पूर्वं हि धातुरुपसर्गेण युज्यते पश्चात्साधनेन", "पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण" त्रिष्वडादिषु विषयेषु धातूनां यद्रूपं लभ्यते तन्नीचैः उदाह्रियते (१.१.४ धातुः)

## Bibliography


1. Bruno Liebick. *Concordance Panini- Chandra.* Indische Forschungen 6, Breslau : Marcus, 1928.
2. Anand Misra. *Simulating the paninian system of sanskrit grammar,* Sanskrit Computational Linguistics 1 & 2, pages 127--138, 2009.
3. Shailaja N. *Comparison of Paniniya Dhatuvrtties* - Ph.D Thesis. Department of Sanskrit Studies, University of Hyderabad, Hyderabad, 2014.
4. G. B Palsule. *Concordence of Sanskrit Dhātupāthas*. Bhandarkar Oriental Research Institute, Pune, 1955.
5. Peter Scharf. *Madhaviyadhatuvrittisaidhantikanukramani*, Providence. RI : The Sanskrit Library, 2009.
6. Peter Scharf. *Modelling paninian grammar. Sanskrit Computational Linguistics* 1 & 2, pages 95--126, 2009.
7. गोविन्दाचार्य. *वैय्याकरणसिद्धान्तकौमुदी*, चौखम्बा सुरभारति प्रकाशन, वाराणसी.